Toppersnotes
Unleash the topper in you

# UGC-NET

# संस्कृत

NATIONAL TESTING AGENCY (NTA)

पेपर - 2 || भाग - 3

SIERRA INNOVATIONS

# विषय सूची


इकाई – अष्टमः

विशिष्ट अध्ययन 1

- पद्य
- नाटच
- गद्य
- चम्पूकाव्य
- साहित्यदर्पण
- काव्यप्रकाश
- अंलकार
- ध्वन्यालोक
- वक्रोक्तिजीवितम्
- भरत – नाटचशास्त्रम्
- दशरूपकम्
- छन्द परिचय

इकाई – नवमः

पुराणेतिहास, धर्मशास्त्र एवं अभिलेखशास्त्र 184

इकाई – दशमः

विशिष्ट अध्ययन 207

- कौटिलीय – अर्थशास्त्र
- मनुस्मृति
- याज्ञवल्क्यस्मृति
- लिपि तथा अभिलेख

Toppersnotes
Unleash the topper in you

# इकाई-अष्टमः

# अधोलिखितानाम विशिष्टम अध्ययनं

# पद्ध भागम

## बुद्धचरितम्-(प्रथमः सर्गः)

अष्टविंशति सर्गात्मकं बुद्धचरितम् महाकाव्यं महाकविना अश्वघोषेन विरचितम् । अश्वघोषः बौद्धधर्म प्रचाराय काव्यं विरचितवान् । हृदयगत भावनाया उदबोधिका भवति कविता | कविता मानवहृदयम् उत्तेजयति समाकर्षति च । अतः प्राचीनकालादेव मानवः धर्मस्य स्वोद्देश्यस्य च प्रचाराय कवितायाः आश्रयं गृह्णाति । इत्थम् उद्देश्यम् अश्वघोषस्य इयं काव्यकृतिः बुद्धचरितम् इति बौद्धधर्मस्य दार्शनिक विचाराणां प्रचारिका विद्यते। सौन्दरनन्दस्यान्ते कविना अश्वघोषेन स्वयमेवोक्तम् यथा तिक्तौषधिंपानाय मधुना मधुना सम्मेल्यते तथैवाहं धर्मप्रचाराय काव्यस्य आश्रयं गृहीतवान् अस्मि।।

अश्वघोषः प्रकाण्ड-विद्वानासीत् । अन्तः साक्ष्याधारे इदं ज्ञायते यत् सः अयोध्यायाः निवासी आसीत् । अस्य जनन्याः नाम सुवर्णाक्षी आसीत् । किंवदन्त्यानुसारेण सः जन्मना ब्राह्मणः आसीत् । एतदन्तरं सः बौद्धधर्मे दीक्षितः अभवत् । बौद्धधर्मे दीक्षितो भूत्वा प्रचारार्थं सुदूरदेशान् यावत् भ्रमणम् अकरोत् ।

महाकविः अश्वघोष वेदानां शास्त्राणां रामायण-महाभारत दर्शनानां च गहनम् अध्ययनम् अकरोत् । तस्य ग्रन्थैः इदं ज्ञायते यत् तस्य युवावस्था विषयभोग-प्रधाना आसीत् ।

## स्थितिकालः

अश्वघोष सम्बन्धः राज्ञा कनिष्केन सह अपि आसीत् यतोहि मातृचेटकविषु अश्वघोषस्य कवितायाः प्रभावो दृश्यते । अतः कनिष्कस्य समकालीनः किञ्चित् पूर्ववर्ती वा अश्वघोषः इति स्वीक्रियते। अतः अश्वघोषस्य स्थितिकालः 150 ईस्वीपूर्व सामान्यतः मन्यते।

**कृतित्वम्**-अश्वघोषस्य रचनानां सम्बन्धे पर्याप्ताः मतभेदाः सन्ति । विभिन्न सूत्रानुसारेण अश्वघोषस्य रचनासंख्या 19 यावत् प्राप्यते। परम् अधुना अश्वघोषस्य नाम्ना प्रसिद्धाः एते ग्रन्थाः-(1) बुद्धचरितम्, (2) सौन्दरनन्दः, (3) शारिपुत्रप्रकरणम्, (4) सूत्रालंकारः, (5) वज्रसूची, (6) महायान श्रद्धोत्पादः, (7) गाण्डीस्तोत्रगाथा, (8) राष्ट्रपालः । एतेषु प्रामाणिकाः ग्रन्था एते सन्ति-(1) बुद्धचरितम्, (2) सौन्दरनन्दः, (3) शारिपुत्रप्रकरणम् ।

एतेषां कृतीनां सम्बन्धे विद्वान्सः मतैक्यः न सन्ति परं निरपेक्षरूपेण सर्वे विद्वान्स इदं मतं स्वीकुर्वन्ति यत् अश्वघोष द्वौ महाकाव्यौ-बुद्धचरितम् सौन्दरनन्द एकं नाटकम् शारिपुत्र-प्रकरणम् रचितवान्।

अश्वघोषविरचिते बुद्धचरितमहाकाव्य महात्मनः गौतमबुद्धस्य चरित्र वर्णितमस्ति । यद्यपि अस्मिन् 28 सर्गाः आसन् तथापि सम्प्रति केवल 18 सर्गाः समुपलभ्यन्ते। तेष्वपि प्राथमिकाः 14 सर्गाः एव अश्वघोषरचिताः सन्ति। अन्ये चत्वारः सर्गाः केनापि नैपालदेशीय कविना रचिताः सन्ति ।

## अश्वघोषस्य शैली

अश्वघोषः वैदर्भीरीतेः कविः मन्यते यतः सः रामायण-महाभारत-कालिदास च शैल्या अतिप्रभावितः। तस्य शैल्यां प्रसाद-माधुर्यगुणयोः बाहुल्यम् अस्ति। वर्णनेषु याथार्थ्यम् सजीवता स्वाभाविक्यम्, वैचित्र्यम् च अस्ति । अनुप्रास यमक-उपमाअर्थान्तरन्यासालंकाराणाम् सौन्दर्य समुपलभ्यते । सम्भोग-विप्रलम्भश्रृंगार करुणरसानां च मनोहरं प्रतिपादनम् प्राप्यते। बुद्धचरितस्य अधिसर्गेषु उपजातिछन्दस् प्रयुक्तम्।।

## एकस्यां दृष्टौ प्रश्नोंतराणि

| | |
|---|---|
| 1. प्रणेता | -महाकविः अश्वघोषः |
| 2. अन्यनाम | -आर्यभदन्तः बौद्धभिक्षुः |
| 3. मातुर्नाम | -सुवर्णाक्षी |
| 4. जन्म-स्थानम् | -साकेतः (अयोध्या) |
| 5. स्थितिकालः | -78 ई. प्रथम शताब्दी |
| 6. विधा | -महाकाव्यम् |
| 7. सर्ग संख्या | -मूलतः 28 सर्गाः परं संस्कृते 14 सर्गाः एव प्राप्यन्ते। |
| 8. उपजीव्य | -'ललित विस्तर नामकः बौद्ध ग्रन्थः इतिहासप्रसिद्धः |
| 9. अङ्गीरसः | -शान्तरस |
| 10. छन्द-योजना | -अनुष्टुप् व उपजातिः |
| 11. अलंकार | -उपमा, रूपक, अनुप्रासः उत्प्रेक्षा। |
| 12. प्रमुखाः सूक्तयः | - (1) सर्वस्य लोके नियतो विनाशः, (2) कामसज्ञ विषमाददीत |
| 13. कृतित्व | -प्रामाणिकाः त्रयः ग्रन्थाः (1) बुद्धचरितम्, (2) सौन्दरनन्दः, (3) शारिपुत्र-प्रकरणम् । |

# रघुवंशमहाकाव्यस्य

## रघुवंशमहाकाव्यस्य सामान्यपरिचयः

देववाण्याः मूर्धन्यकवेः कालिदासस्य न केवलं समग्रासु कृतिषु अपितु सस्कृतसाहित्यजगति रघुवंशम् एकमुत्कृष्टं महाकाव्यं मन्यते। इदं संस्कृतसाहित्यस्य अमूल्यं रत्नं विद्यते । आदर्शानां सृष्टिः यादृशी रघुवंशे दृश्यते तादृशी अन्यत्र नैव दृश्यते । त्यागस्य, तपस्यायाः तपोवनस्य च एतत्त्रयाणां समन्वयः अस्मिन् काव्ये सर्वत्र द्रष्टुं शक्यते। इदं महाकाव्यं कालिदासस्य प्रौढतमप्रतिभायाः परिचायकम् यदेकोनविंशतिसर्गैः निबद्धम् नवषष्ट्यधिकपञ्च-दशशतमिताना (1569) श्लोकाना महाकाव्यमास्ते। अस्मिन् महाकाव्ये एकत्रिंशत्सूर्यवंशीयाना राज्ञा कथा वर्णिताऽस्ति। परमतेजस्विनः नृपतेः दिलीपाद् आरभ्य विलासिनं राजानम् अग्निवर्ण यावत मां कथा आरोह अवरोहैः वर्णिता विद्यते। मध्ये मध्ये दिलीपस्य गोसेवा रघुकौत्स-सम्वादः ताडकावधः सीतापरित्यागः सदशा कशा, वर्तन्ते।

## प्रतियोगिता साहि प्रतिपाद्यविषयामाधृत्य रघुवंशस्य प्रथमसर्गस्य सारः

प्रतिपाद्यविषयामाधृत्य रघुवंशस्य प्रथमसर्गस्य सारः इत्थं विद्यते :

सर्वप्रथम राजा मनुर्बभूव । तस्य पवित्रे वंशे राजा दिलीपः जन्म लेभे यस्य महनीयचरित्रेण एव रघुवंशस्य कथा आरभते ।

राज्ञः दिलीपस्य चिरकालं यावत् सन्तत्यभावात् संसारस्य समग्र-- भोगविलासार्हवस्तूनां विद्यमानत्वेऽपि समस्तः संसारः शून्य इव प्रत्यभात्। एकस्मिन्नहनि सः स्वधर्मपल्या सुदक्षिणया सार्धं रथमास्थितः गुरोः वसिष्ठस्य आश्रमम् आजगाम तथा तं प्रार्थितवान्-भगवन् भवदनुग्रहेण मम सर्वसुख प्राप्तमस्ति किन्तु इमा सुदक्षिणा पुत्रहीना सन्दृश्य राज्यलक्ष्मीः अपि मा साम्प्रतं न रोचते।

महर्षिः वसिष्ठः मुहूर्त यावत् चित्तैकाग्रयेण सन्तत्यभावस्य रहस्यमथवा कारणमवगम्य नृपतिं दिलीपम् अब्रवीत्। एकदा त्वया स्वर्गात प्रत्यागच्छता ऋतुस्नातायाः धर्मपल्याः अन्तिकागमनस्य शीघ्रताया मार्गे अवस्थिता कामधेनुः परिक्रमणादिरूपेण तामसम्पूज्य अनादृता । अतः सा तुभ्यं शाप दत्तवती-"यावत्त्वं मम सन्ततिं न सेवसे तावत् त्वं सन्तानं नैव लप्स्यसे।' सम्प्रति सा कामधेनुः वरुणलोके एकस्मै यज्ञाय अवस्थिता विद्यते । अतस्त्वं तत्पुत्रीं नन्दिनीमाराधय । एवं ब्रुबति गुरुवर्ये वनाद् नन्दिनी तत्र प्रत्यागता । इदमवलोक्य शाकुनशास्त्रस्य ज्ञाता वसिष्ठः राजानं दिलीपमुवाच-"तवाभिलाषा अतिशीघ्र पूर्णत्वं यास्यति ।" एव वसिष्ठद्वारा तदाश्रमे नन्दिनी-सेवायाः निर्देश प्राप्य राजा दिलीपः एकाग्रचित्तः सन् गोसेवाव्रते संलग्नः सञ्जायते।

## प्रतिपाद्यविषयामाधृत्य रघुवंशस्य चतुर्थसर्गस्य सारः

बनवासादत् प्रतिनिवृत्तौ (प्रत्यागतौ) राम-लक्ष्मणौ स्वामिनः स्वर्गगमनात् अत्यन्त दुःख निरन्तरम् अनुभवन्त्यौ कौशल्या सुमित्रा च एवमश्रुपूरितनेत्रत्वात् अभिज्ञातुं नाशक्नुताम् । सीता प्राणमत्। अनन्तरं वसिष्ठस्य आदेशात वानरैः जलमानीयत तथाऽभिषिक्तौ रामलक्ष्मणौ पितः प्रासादं प्राप्तवन्तौ । सर्वप्रथम

कैकेयी प्रणम्य सर्वाः मातृः प्राणमताम् । दण्डकारण्यस्य चिर युक्त दुःख व्यस्मरताम् । तदनु सीतायाः पीताभ मुखं विलोक्य गर्भधारणस्य लक्षणानि विज्ञाय विपिन भ्रमणार्थमगच्छताम्।

केनचिद् गुप्तचरेण सीताविषयकमपवादं संश्रुत्य रामः सर्वान् भ्रातृन् आह्वयत तथा लक्ष्मणाय सीता वाल्मीकि-आश्रमस्य समीप परित्यक्तुम् । आदिदेश । कठोरमिम विचारम् आकर्ण्य सर्वे भ्रातरः स्तब्धाः अभवन् । मिथ्यापवादमपि मौनः लक्ष्मणः रामस्य आज्ञामिति स्वीकृत्य सीतां रथम् आरोह्य वनमनयत् । तत्र गत्वा लक्ष्मणस्य मुखाद् रामस्य विचारान् श्रुत्वा सीता मूर्छिता सती भूम्यामपतत् । लक्ष्मणः आश्वासनं प्रदाय वाल्मीकिआश्रमस्य पन्थानं निर्दिश्य कठोरतापूर्वक प्रतिनिवृत्तः। सीता अनाथावत् कुररीपक्षिणी इव विललाप । विलापं श्रुत्वा वाल्मीकिः सीतायाः अन्तिकम् आजगाम तथा आश्रमे गुरुपत्नीभिः सह उषित्वा वृक्षान् जलेन अभिषिच्य समय व्यतिगमयितुमकथयत्। रामः सीतायाः विरहेण भृशं पीडितोऽभवत् । सुवर्णमयीं सीतां कारयित्वा (रचयित्वा) अश्वमेधयज्ञसम्पूर्तेः वृत्तं श्रुत्वा सीता प्रसन्नाऽभवत् ।

## श्लोकानां व्याख्या

**वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।**
**जगतः पितरौ वन्देपार्वतीपरमेश्वरौ।।1/1||**

**प्रसंगः**-परम्परया कवयः स्वकृतेः निर्विघ्नपरिसमाप्त्यर्थं स्वकाव्यस्य आरम्भे मङ्गलाचरणं कुर्वन्ति अतएव अत्रापि कविकुलगुरुः कालिदासः स्व-इष्टदेवस्तवनात्मक मङ्गलाचरणं कुर्वन् संसारस्य मातापितरौ । पातीपरमेश्वरौ वन्दते ।

**व्याख्या**-शब्दार्थ इव नित्यं परस्परं सम्बद्धौ एवं संसारस्य मातापितरौ अर्थात् भगवती पार्वती तथा भगवन्तं शङ्करं शब्दार्थबोधाय अहं (कालिदासः) प्रणमामि।

**क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।**

**तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ||1/2||**

**व्याख्या**-सूर्यात् उत्पन्न, वंशः अर्थात् सूर्यवश अथवा रघुदश क्व अल्पविषयान् ज्ञात्री मदीया मन्दबुद्धिः कुत्र अर्थात् अनयोः महद् अन्तर विद्यते तथापि अहम् अज्ञानवशात् एकया लघुनौकया अगाधम् एवं सुविस्तृत समुद्र तरितुमिच्छामि । अर्थात् मन्दबुद्धि एवम् अल्पज्ञोऽपि अह स्वमहद्गुणकारणात महान्तम् अथवा अतिशयमहिमान्वित सूर्यवश स्वकाव्येन वर्णयितुम् अभिलषामि।

**मन्द : कवियशः प्रार्थी गमिष्याम्युपहारयताम्।**

**प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः ||1/31/**

**व्याख्या**-कालिदासः आह "मूल्ऽह कवीना यशसः अभिलाषी अथदा कविकीर्तिकामुकः सुदीर्घ पुरुषैः प्रासु योग्यस्य फलस्य विषय लाभवशात् ऊर्ध्वभुज तथा लघुकायः वामनः मनुष्य इव उपहासस्य पात्रता प्राप्स्यामि ।

**अथवा कृतवागद्वारे वंशेऽस्मिन्पूर्वसूरिभिः।**

**मणौ वज्र समुत्कीर्णे सूत्रस्येवारित मे गतिः ||1/4||**

**व्याख्या**-अथवा वाल्मीकि-प्रभृतिभिः पूर्वकविभिः रामायणादिषु काव्येषु रचितषु सूर्यवंशस्य वर्णनं तादगेवास्ति यथा वजेण अर्थात् यंत्रविशेषेण समुत्कीर्ण अर्थात कृतछिद्रे मणौ सूत्रस्य गतिः सरला भवति तथैव अहमपि सरलतया सूर्यवंशस्य वर्णनं कर्तुं समर्थो भविष्यामि।

**सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम्।।**

**आसमुद्रक्षितीशानामानाकरथवर्त्मनाम्।।1/511**

**व्याख्या**-सः अहं कालिदासः जन्मनः आरभ्य एव संस्कारयुक्तानाम् कार्यसिद्धि यावत् प्रयत्नपराणाम् समुद्रपर्यन्तायाः पृथिव्याः स्वामिनाम् अर्थात् शासितानाम् स्वर्ग यावत् स्वरथेन यात्राकर्तृणाम् रघुवंशीयानां नृपाणा वर्णन करिष्यामि ।

**यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम्।**

**यथापराधदण्डानां यथाकालप्रबोधिनाम् ||1/611**

**व्याख्या**-विधिपूर्वकम् अनुष्ठितयज्ञानाम् याचकेभ्यः यथेच्छ दानकर्तृणाम् अपराधमनुसृत्य दण्डयोग्येभ्यः दण्डदातृणाम् यथाकाले सावधानानाम् (जागृतानाम्) रघुवंशीयानां नृपाणां वर्णनं करिष्यामि ।

**त्यागाय संभृतार्थानां सत्याय मितभाषिणाम्।**

**यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ||1/711**

**व्याख्या**-ये केवलं धनं कर्तुमेव धनसंग्रहं कुर्वन्ति स्म, ये सत्य-धर्मस्य पालनाय अल्पमेव भाषणं कुर्वन्ति स्म, ये स्वयशसः संवर्धनाय अन्यान् । देशान् जयन्ति स्म, ये मात्र सन्ततिहेतवे एव विवाहबन्धनं स्वीकुर्वन्ति स्म । एवं विधाना रघुवंशस्य नृपाणां वर्णनमहं करिष्ये ।।

**शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।**

**बार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ||1/8॥**

**व्याख्या**-ये बाल्यावस्थायां विद्याभ्यास कुर्वन्ति, युवावस्थायामेव केवल विषयान् सेवन्ते, वृद्धावस्थायां मुनिवृत्या आचरन्ति, मृत्युसमये योगविधिना शरीरस्य त्याग कुर्वन्ति एवं विधानां रघुवंशस्य राज्ञा वर्णनं करिष्यामि ।

**रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपिसन।**

**तद्गुणैः कर्णामागत्य चापलाय प्रचोदितः ॥1/9॥**

**व्याख्या**-महाकविः कालिदासः कथयति यदल्पज्ञोऽप्यह रघुकुलस्य भूपतीना। चरित्रवर्णनं करिष्यामि यतः तेषां गुणैरेव मम कर्णरन्धं प्रविश्य रघुवंशमहाकाव्यस्य विरचनरूपचपलतायै अहं प्रेरितोऽस्मि ।

**तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः।**

**हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धि : श्यामिकापि वा।11/1011**

**व्याख्या**-गुणदोषज्ञाः सज्जना एव रघुवंशमहाकाव्यं श्रोतुं योग्याः वत यतः सुवर्णस्य (काञ्चनस्य) विशुद्धता एवं दोष-परीक्षा अग्नौ एव भवितु शक्य

**वैवस्वत मनु म माननीयो मनीषिणाम्।।**

**आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव||1/11||**

**व्याख्या**-यथा वेदेषु वा वैदिक-छन्दस्सु (मन्त्रेषु) सर्वप्रथमम् ॐकार एव (प्रणवः) सर्वश्रेष्ठः आद्यः मन्त्र, अस्ति तथा भूपतीनां तथा ज्ञानिजनानां सम्माननीयः सूर्यपुत्रः मनुः अभवत् ।

**तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः।**

**दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव||1/12।।**

**व्याख्या**-तस्मिन् सूर्यपुत्रस्य मनोः वंशे अत्यन्तं पवित्रचरित्रवान् राज्ञा श्रेष्ठः महाराजः दिलीपः क्षीरसागरे देव-दानवाना मन्थनेन समुत्पन्ने चतुर्दशरत्नेषु चन्द्रः इव उत्पन्नः अभवत्।

**व्यूढोरस्को वृषस्कन्ध : शालप्रांशुमहाभुजः।**

**आत्मकर्मक्षम देहं क्षात्रो धर्म इवाश्रितः ।।1/13।।**

**व्याख्या**-राज्ञः दिलीपस्य वक्षः विस्तृतम्, वृषभस्य स्कन्ध इव तस्य स्कन्धी उन्नती सुपुष्ट आस्ताम्, शालवृक्षेण सदृशे दीर्घ भुजे अभवताम्, तस्य तेजस्वितामवलोक्य एवं प्रतीयते स्म यत्क्षात्रः धर्म एव तस्य तेजस्वि शरीरमाश्रित्य प्रकटीभूतोऽस्ति।

**सर्वातिरिक्तसारेण सर्वतेजोभिभाविना।।**

**स्थितः सर्वोन्नतेनोर्वी क्रान्त्वा मेरुरिवात्मना।।1/14||**

**व्याख्या**-यथा सुमेरुणापर्वतेन स्वदृढतया संसारस्य सर्वे दृढपदार्थाः पराभूताः, - स्वदीप्त्या सर्वाणि दीप्तिमन्ति वस्तुनि ह्रसितानि अर्थात हीनानि कृतानि, स्व-औन्नत्येन सकलाः उन्नताः पदार्थाः परास्ताः कृताः तथा स्वविस्तारेण सर्वा पृथिवी एव आच्छादिता तथैव राज्ञा दिलीपेनापि स्ववलेन, तेजसा, सौष्ठवसम्पन्नशरीरेण सर्वेषां ह्रासं विधाय भूदेवी स्वमुष्टी कृताऽस्ति ।

**प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।**

**सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ||1/18।।**

**व्याख्या**-यथा सूर्यः स्वरश्मिभिः पृथिव्याः यावतः जलस्य अवशोषणं करोति एवं तस्य सहस्रगुणं जलं वर्षयति तथैव राजा दिलीपोऽपि प्रजायाः कल्याणाय (विकासादिकार्येभ्यः) यत्करं गृह्णाति स्म तत्करस्य अनेगुणाधिकमुपकारं प्रजायाः करोति स्म।

**सेना परिच्छदस्तस्यद्वयमेवार्थसाधनम्।**

**शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्वी धनुषि चातता।।1/19।।**

**व्याख्या**-महाराजदिलीपस्य शास्त्राणां ज्ञानं प्रभूतमासीत् तथा सः अद्वितीयः वीरः धनुर्धरः आसीत्, अतः सः सर्वं कार्यं स्वतीक्ष्णबुद्धया एवं । धनुषि आकृष्ट्या प्रत्यञ्चया (मौ०) एव सम्पादितवान् । अर्थात् सः कस्यचिदपि कार्यस्य सम्पादनार्थम अन्यस्य साहाय्यं न गृह्णाति स्म।

**तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च।।**

**फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव।।1/2011**

**व्याख्या**-राजा दिलीपः स्वमनसः भेदं कमपि न ज्ञापितवान तथा स्वभावभंगिमाभिरपि स्वमनसः रहस्यं न वेदयति स्म। यथा अस्मिन् जन्मनि कस्यापि जीवनमवलोक्य जनाः अवगच्छन्ति यदनेन पूर्वजन्मनि कीदृशानि कर्माणि कृतानि तथैव राज्ञः दिलीपस्य मनसः रहस्यं तदैव जना अवागच्छन् यदा तत फलरूपेण समक्ष प्रकटितमभवत् ।

**जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः।**

**अगृध्यनुराददे सोऽर्थमसक्तः सुखमन्वभूत्।।1/2017**

**व्याख्या**-सः भयमुक्तः मन् आत्मानं रक्षितवान् । अव्याकुलः सन् धर्मस्य सेवनमकरोत् । लोभं त्यक्तवा धनस्य संग्रहं कृतवान् तथा मोह परित्यज्य संसारस्य सुखानि अनुभूतवान्।

**ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।**

**गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव||1/22||**

**व्याख्या**-ज्ञाने मौनधारणम्, शक्तौ विद्यमानायां क्षमा, त्यागे अर्थात् दानशीलत्वादपि आत्मप्रशंसाया अभावः एते तेस्य गणाः मोनादि विरुद्धैः गुणैः सह सम्बद्धत्वात् सोदरा (सहोदरा) इव अभवन् ।

**प्रजानां विनयाधानाद् रक्षणाद भरणादपि।।**

**स पिता पितरस्तासां केवलं जन्म हेतवः ||1/24|| .**

**व्याख्या**-विनम्रतादिगणानां शिक्षाप्रदानात, आपत्तिकाले रक्षणात, तथा अन्नादिभिः भरणपोषणात सः राजा दिलीप एव प्रजानां वास्तविकः पिता आसीत तथा तासां प्रजानां स्वमातापितरस्तु केवलं जन्मनः कारणान्यभवन् ।

**दुदोह गां स यज्ञाय सस्याय मघवा दिवम्।।**

**संपद्विनिमयेनोभो दधतुर्भुवनद्वयम्।।1/26।।**

**व्याख्या-**राजा दिलीपः प्रजायाः यत्करं गृह्णाति स्म, तत्करं सः इन्द्रप्रसादनाय यज्ञे प्रयोजयत् तथा इन्द्रोऽपि प्रसन्नः सन् वर्षणाम् आकाशस्य दोहनमकरोत् अर्थात् आकाशातू जलम् अवर्षयत् येन क्षेत्राणि धान्यपूर्णानि भवन्ति स्म । इत्थं राजा दिलीपः तथा इन्द्रः अन्योन्यस्य सहायता कृत्वा उभौ लोको पालयामासतुः ।

**तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा।**

**पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा।।1/31।।**

**व्याख्या**-तस्य महाराजस्य दिलीपस्य मगधराजवंशे समुद्भूता अन्यस्य इच्छानुकूलाचरणेन यज्ञस्य पत्नी दक्षिणा इव 'सुदक्षिणा'-नाम्ना प्रसिद्धा धर्मपत्नी महाराज्ञी सुदक्षिणाऽऽसीत् ।

**सन्तानार्थाय विधये स्वभुजादवतारिता।**

**तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे ||1/34||**

**व्याख्या**-तदा महाराजः दिलीपः निश्चयं कृतवान् यत् कोऽप्युपायः अवश्यमेव करणीयः, अतः पुत्रप्राप्त्यर्थं 'साधनायै सर्वप्रथम स्वविशालराज्यस्य गुरुतरं भार स्वस्कन्धाभ्याम् अवतार्य मंत्रिषु समर्पितवान्।

**श्रेणीबन्धाद्वितन्वभिरस्तम्भां तोरणग्रजम्।।**

**सारसैः कलनिर्बादैः क्वचिदुन्नमिताननौ ||1/41||**

**व्याख्या**-पंक्तिबद्धत्वात् उत्पतनेन स्तम्भरहित सिंहद्वारावलम्बितां माला विस्तारयद्भिः अतएव शोभायमानैः सुन्दरमधुरशब्दकादिभिः सारसैः उपरिमुखमुत्थाप्य पश्यन्तौ सुदक्षिणां राजा दिलीपश्च वसिष्ठस्य आश्रमम् अगच्छताम् ।

**पवनस्यानुकूलत्वात्प्रार्थनासिद्धिशंसनिः।।**

**रजोभिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ ।।1/42।।**

**व्याख्या-**यदा सुदक्षिणा तथा राजा दिलीपः वसिष्ठाश्रमं गच्छन्तौ आस्ताम् तदानीं तयोः मनोरथस्य सफलतायाः सूचकः पवनः अनुकूलः सन् बहति स्म तथा तयोः रथस्य अश्वखुरोत्पातिताः धूलयः अपि राज्ञः वेष्टनम् एवं राज्ञयाः केशान् नैव स्पष्टुं समर्थाः अभवन् । अर्थात् समस्तमेव वातावरण महाराज-दिलीपस्य अनुकूलमेवासीत्।

**तमातिथ्यक्रियाशान्तस्थक्षोभपरिश्रमम्।।**

**पप्रच्छ कुशलं राज्ये राज्याश्रममुनि मुनिः ।।1/58।।**

व्याख्या-सर्वप्रथमन्तु महर्षिः वसिष्ठः तयोः इयदातिथ्यसत्कारम् । अकरोत यत् रथस्य क्षोभात् उत्पन्नः परिश्रमस्तेन शान्तोऽभवत् । अनन्तरं राज्याश्रममुनिम अर्थात् राजर्षि दिलीपं तस्य राज्ये कुशलम् अपृच्छत्।

**उपपन्नं ननु शिवं सप्तस्वङ्गेषु यस्य मे।**

**दैवानां मानुषीणां च प्रतिहर्ता त्वमापदाम्।।1/6011**

**व्याख्या**-हे गुरुवर! स्वामि-मन्त्रि-मित्र-कोष-दुर्ग-सैन्य-इत्येतेषु सप्तसु अंगेषु मम राज्ये सर्वप्रकारेण शिवं वा कुशलं कथं न भवेत् यस्य अग्नि-जलरोग-दुर्भिक्ष-मरण-इति-दैव-आपत्तीनाम् तथा वञ्चक-दस्यु-शत्रुराजकृपापात्रलोभ-इत्येतन्मानुषीणाम् आपत्तीनाम् तत्रभवान् मम गुरुः निवारयिता विद्यते।

**मत्परं दुर्लभं मत्वा नूनमावर्जितं मया।**

**पयः पूर्व स्वनिःश्वासैः कवोष्णमुपभुज्यते।।1/67।।**

**व्याख्या**-यदा अहं तर्पणसमये पितृभ्यः जलदानं करोमि तदानीं मम पितरः इदं विचिन्त्य दुःखेन श्वासं गृह्णन्ति यदस्य अनन्तरं कः अस्मभ्यं जल प्रदास्यति अतस्ते दुःखित-श्वासकारणात् उष्णमेव जलं पिबन्ति।

**लोकान्तरसुखं पुण्यं तपोदानसमुद्भवम्।।**

**सन्ततिः शुद्धवंश्या हि परत्रेह च शर्मणे।।1/69।।**

**व्याख्या**-तपस्यया एवं दानेन यत्पुण्यं प्राप्तं भवति तत्तु मरणानन्तरमेव परलोके सुखं प्रददाति, किन्तु शुद्ध-वंशोत्पन्नः पुत्रः अस्मिन् । संसारे तथा परस्मिन् लोकेऽपि कल्याणकारको भवति।

**स शापो न त्वयाराजन च सारथिना श्रुतः।।**

**नदत्याकाशगङ्गायाः स्रोतस्युद्दामदिग्गजे।।1/78।।**

**व्याख्या**-एवं कामधेन्वा प्रदत्तः शापः त्वया एवं तव सारथिना अपि न श्रुतः ग अर्थात् आकर्णितः यतः तदानीम् आकाशगंगायाः प्रवाहे प्रवलाः । दिग्गजाः नदन्तः नि आसन्।

**सुतां तदीयां सुरभेः कृत्वा प्रतिनिधि शुचिः।।**

**आराधय सपत्नीकः प्रीता कामदुघा हि सा।।1/81।।**

**व्याख्या**-अधुनाऽत्र कामधेनुस्तु न विद्यते अतस्त्वं तस्याः कामधेनोः पुत्री तस्याः प्रतिनिधिरूपां मत्वा तत्सेवायां संलग्नो भव, त्वं स्वपत्न्या सार्धं पूर्णमनोयोगपूर्वकं तां नन्दिनीं सेवस्व, युवयोः सेवया यदि सा प्रसन्ना स्यात् तर्हि । अवश्यमेव सा तव कामना पूरयिष्यति।

**अदूरवर्तिनी सिद्धि राजन् ! विगणयात्मनः।**

**उपस्थितेयं कल्याणी नाम्नि कीर्तिते एव यत् ।।1/86।।**

**व्याख्या**-महर्षिः वसिष्ठः महाराजं दिलीपं वक्ति यदु हे राजन् ! त्वं स्वकार्यस्य । सफलता शीघसम्भाविनीम् अवगच्छ। अर्थात् शीघ्रमेव तव मनोरथः पूर्णतां यास्यति यत इयं मङ्गलमयी मूर्तिः गौः नन्दिनीति नाम्नि गृहीते एव एषा तव वार्ताप्रसंगे स्वयमेव उपस्थिता जाताऽस्ति ।

**प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः।।**

**निषण्णायां निषीदास्यां पीताम्भसि पिबेरपः ।।1/89।।**

**व्याख्या**-महर्षिः वसिष्ठः राजानं निर्दिशति यद् यदा नन्दिनी चलेतु तदा । त्वमपि इमामनुगच्छ, यदा अवस्थिता भवेत् तदा त्वमपि अवस्थितो भव, यदा एषा उपविशेत् तदा त्वमपि उपविश, यदा च जलं पिवेत् त्वमपि जलं पिव । एवं त्वं सेवायमाणो भव।

**निर्दिष्टां कुलपतिना स पर्णशाला**

**मध्यास्य प्रयतपरिग्रहद्वितीयः।**

**तच्छिष्याध्ययननिवेदितावसानां**

**संविष्टः कुशशयने निशां निनाय॥**

**व्याख्या**-महाराजः दिलीपः कुलपतिना वसिष्ठेन निर्दिष्टां पर्णकुटी प्रविश्य राज्ञीनां पवित्रतमा पाणिगृहीता पत्नी सुदक्षिणा एवं राजा गुरुप्रदत्ते कुशकटे अथवा कुशशयने अशयाताम् अर्थात् शयनमकुरुताम् । तथा रात्र्यवसाने महर्षेः वसिष्ठस्य शिष्यैः उच्चरितवेदघोषस्य महानादेन रात्रिअवसानम् अवगत्य ब्रह्मवेलायामेव उदतिष्ठताम्।

**भर्तुः प्रणाशादथ शोचनीयं**

**दशाऽन्तरं तत्र समं प्रपंन्ने।**

**अपश्यतां दाशरथी जनन्यौ**

**छेदादिवोपघ्नतरोतत्यौ।।14/1॥**

**व्याख्या**-तत्र तस्मिन् महोपवने दशरथस्य पुत्रौ रामलक्ष्मणौ पतिदेवे दशरथे दिवंगते शोचनीयामवस्था प्राप्ते उभे भ्रातरौ कौशल्यां सुमित्रां च सममेवमपश्यताम् यथा आश्रयदातरि वृक्षे छिन्ने उच्छिन्ने द्वे लते दुर्दशाग्रस्त भवतः ।

**उभावुभाभ्यां प्रणातौ हतारी**

**यथाक्रम विक्रमशोभिनौ तौ।**

**विस्पष्टमम्रान्धतया न दृष्टौ ।**

**ज्ञातौ सुतस्पर्शसुखो पलम्भात्।।14/2॥**

**व्याख्या**-पराक्रमी रामः लक्ष्मणश्च क्रमशः कौशल्यां सुमित्रा च प्राणमताम् । स्व पुत्रौ अवलोकयन्त्यौ उभे एव मातयै अश्रुपूरितनयने अभवताम् अतएव ते पूर्णतः अर्थात् सम्यक् प्रकारेण तौ द्रष्टुं तु न अशक्नुताम् परन्तु पुत्रौ वात्सल्येन । सुतस्पर्शजन्यसुखेन अवागच्छताम् ।

**सरित्समुद्रान्सरसीश्च गत्वा**

**रक्षा : कपीन्द्ररुपपादितानि।**

**तस्यापतन्मूर्ध्निजलानि जिष्णो**

**विन्ध्यस्य मेघप्रभवा इवापः॥14/8।।**

**व्याख्या**-राक्षसानां वानराणाञ्चं नायकैः नदीः जलाशयान् वा तडागान् गत्वा यज्जलमानीय प्रदत्तम् तदभिषेककाले रामस्य शिरसि तथैव अवर्षत् यथा विन्ध्याचलस्य शिखरे जलदैः आनीत सलिलम् अभिवर्षति

**कृताञ्जलिस्तत्र यदम्ब**

**सत्यान्नाभ्रश्यत स्वर्गफलाद गुरुर्नः।।**

**तच्चिन्त्यमानं सुकृतं तवेति**

**जहार लज्जां भरतस्य मातुः||14/1611**

**व्याख्या**-कैकेयी तत्र उदासीना उपविष्टाऽऽसीत्। कृताञ्जलिः श्रीमान् रामः कैकेयीमवदत् "अम्ब! तवैव पुण्यप्रतापेन अस्माकं पिता तस्मात्सत्यात् विचलितो नाभूत् येन स्वर्ग आप्यते । यदि त्वं तं वरं न अयाचिष्यथाः तर्हि सः त्वां वरं दातुं या प्रतिज्ञां कृतवान्, सा असत्या अभविष्यत्, इदं श्रुत्वा कैकैय्याः मनसि या आत्मग्लानिः आसीत् यद् रामः, न जाने, मम सम्बन्धे किं विचारयति, तमहं कथं स्वमुख दर्शयिष्यामि इति सर्वा ग्लानिः निरगच्छत् अर्थात् गलिताऽभवत्।

**प्रतिप्रयातेषु तपोधनेषु**

**सुखादविज्ञात गतार्धमासान्।**

**सीतास्वहस्तोपहृताग्रयपूजान्**

**रक्षः कपीन्द्रान् विससर्ज रामः||14/19||**

**व्याख्या**-तपस्विषु प्रतिनिवृत्तेषु श्रीरामः राक्षसाधिपतिं विभीषणं तथा कपिपतिं सुग्रीवमपि विसृष्टवान् । एतेषां जनानां सुखदोपस्थितिकारणात् । मासस्य अर्धभागः एवं व्यतीतोऽभवत् यत्प्रयापणस्य ज्ञानं न अभवत् । देवी सीता स्वयं स्वहस्ताभ्याम् एतेभ्य उत्तमोत्तमान् उपहारान् प्रायच्छत् ।

**आवैमि चैनामनघेति किन्तु**

**लोकापवादो बलवान्मतो मे।**

**छाया हि भूमेः शशिनो मलत्वेन**

**आरोपिता शुद्धिमतः प्रजाभिः।।14/40।।**

**व्याख्या**-रामः स्वभ्रातृन् कथयति, यदियं सीता सर्वथा पवित्राऽस्ति इत्यह सम्यग् वेद्मि, परन्तु लोकापवादः सत्यादपि अधिकः बलशाली भवति। पश्यत, चन्द्रमसि पृथिव्याः या छाया दृश्यते, इदं सत्यम् किन्तु जनैः साकृष्णवर्णा छायाऽपि चन्द्रस्य कलङ्कत्वेन मन्यते ।

**रक्षोवधान्तो न च मे**

**प्रयासो व्यर्थः स वैरप्रतिमोचनाय।**

**अमर्षण :शोणितकाङ्क्षया किं ।**

**पदा स्पृशन्तं द्विजिह्व।।14/41।।**

**व्याख्या**-यूयं कथयिष्यथ यद्येवमासीत् तर्हि मया राक्षसाः कथं व्यापादिताः। एतस्य उत्तरः अयमस्ति यत्सीता मोचयितुं मया राक्षसाः हताः, सः मदीयः प्रयासः सीतायाः विमुक्तेः वृथा न कथयिष्यते यतः स्वस्त्रीहरणकारणात् स मम प्रतिषोधरूपः । प्रयत्नः अनिवार्यम् आसीत् । यतः कोऽपि सर्पः यदा चरणस्य नीचैः आगच्छति । तदा सः रक्तलोभान्न दशति, स तु प्रतिषोधकारणेन दशति।

**सा नीयमाना रुचिरान्प्रदेशा**

**प्रियंकरो मे प्रिय इत्यनन्दत्।**

**नाबुद्ध कल्पद्रुमतां विहाय**

**जातं तमात्मन्यसिपत्र वृक्षम्।।14/48।।**

**व्याख्या**-सा सीता मनोहरान् प्रदेशान् नीयमाना इदं विचिन्त्य यन्मम प्राणप्रियः भर्ता सदा मन्मनसः प्रियं वृत्तमेव सम्पादयति, अतः सा आनन्दिता अभूत् । तदानी वस्ततः सा किं ज्ञातवती ? यद् रामः अधुना सीतायै मनोरथस्य पूरककल्पवृक्षत्वं परित्यज्य तत्स्थाने तदसिपत्रवृक्षेण तुल्यः कष्टदायकः सञ्जातः, यस्य पत्राणि असि (खड्ग) वत् तीक्ष्णानि भवन्ति ।

**तवोरुकीर्तिः श्वसुरः सखा मे**

**सतां भवोच्छेदकरः पिता ते।**

**धुरि स्थिता त्वं पतिदेवतानां**

**किंतन्न येनासि ममानुकम्पया।।14/74||**

**व्याख्या**-महायशस्वी तव श्वसुरः मम सखाऽस्ति । तव पिता आत्मज्ञानद्वारा सज्जनानां भवबन्धनोच्छेदकर्ता विद्यते, त्वं स्वयं पतिदेवतानां स्त्रीणाम् अग्रगण्याऽसि, एवं तर्हि पुनः अन्यत् ईदृक् कतमत्कारणं वर्तते येन त्वं मम कृपापात्रं भवितुं न योग्या ? अर्थात् इमानि सर्वाणि कारणानि एकत्र उपस्थितानि सन्ति येनाहं त्वयि अनुग्रहं कर्तुं वाध्यः सञ्जातोऽस्मि, तर्हि त्वं कथं चिन्तयसि ?

**सीता हित्वा दशमुखरिपुर्नोपयेमे पदन्यां,**

**- तस्या एव प्रति कृति सखो यत्कृतूनाजहार।**

**वृतान्तेन श्रवणविषयप्रापिणा तेन भर्तुः,**

**सा दुर्वारं कथमपि परित्यागदुःखं विषहे।।14/87।।**

**व्याख्या**-यतः दशाननरावणस्य हन्ता रामः सीता परित्यज्य अन्यया स्त्रिया सह विवाहं नाकरोत्, तस्या एवं प्रतिमूर्तिं कनकमयीं सीता स्वार्धाङ्गिनी मत्वा यज्ञान् अनुष्ठितवान्, अतः भर्तुः अनेन श्रुतिगोचरीभूतेन वृन्तान्तेन सीता परित्यागजन्यमसह्यं दुःखं कथमपि असहत ।

# एकस्यां दृष्टौ प्रश्नोंत्तराणि

| | |
|---|---|
| 1. रघुवंशम् महाकाव्यस्य रचनाकारः | -महाकविः कालिदासः |
| 2. कालिदासस्य उपाधिः | -दीपशिखाकालिदासः |
| 3. रघुवंशस्य विधा | -महाकाव्यम् |
| 4. कथानकस्य स्रोतः .. | -रामायण-महाकाव्यम् |
| 5. सर्ग संख्या एवं श्लोकसंख्या | -19, 1,569 |
| 6. रघुवंश महाकाव्ये वर्णनमस्ति | -सूर्यवंशस्य एकत्रिंशत् राज्ञाम् |
| 7. यस्य राज्ञः वर्णनं प्रथमे सर्गेऽस्ति | -राजा दिलीपः |
| 8. गोः नाम | -नन्दिनी |
| 9. रघुवंशस्य अङ्गीरसः | -शृंगार रसः |
| 10. रघुवंशे रीतिः | -वैदर्भी रीतिः |
| 11. रघुवंशे गुणस्याभावः | -ओजगुणाभावः |
| 12. रघुवंशे प्रयुक्ताः रसाः | -वीररसः, करुणरसः शान्तरसः |
| 13. युद्ध प्रसंगेषु प्रयुक्तः रसः | -वीररसः |
| 14. अजविलापे प्रयुक्तः रसः | -करुणरसः |
| 15. अग्निवर्णस्य विलासवर्णने प्रयुक्तः रस | -शृंगाररसः |
| 16. वशिष्ठादि वर्णनेषु प्रयुक्तः रसः । | -शान्तरसः |
| 17. रघुवंशस्य महाकाव्यस्य आरम्भिक-वर्णनीयः | राजा -दिलीपः |
| 18. रघुवंश महाकाव्यस्य अन्ते वर्णनीयः राजा | -अग्निवर्णः |
| 19. अग्निवर्णस्य भृत्योः कारणम् | |
| 20. कालिदासस्य जन्मस्थानम्। | -चमोली (गढ़वाल जनपदे) |
| 21. स्थिति कालः | -ई. पू. प्रथमशताब्दी यावत् चतुर्थशताब्याः |
| 22. कालिदासस्य गृहनाम (उपनाम) | -बन्दरू (चञ्चलतायाः कारणात्) |
| 23. जन्मस्थानाधारे नाम | -'कालू', 'कालीचरणः', कालिका प्रसादः कालिकादत्तः |
| 24. कालिदासस्य कृतयः | -सप्त (द्वे खण्डकाव्ये-ऋतुसंहारम् , मेघदूतम् द्वे महाकाव्ये रघुवंशम्, कुमारसम्भवम्; |

| | |
|---|---|
| | त्रीणि नाटकानि-मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलम् |
| 25. सर्वाधिकं प्रयुक्ताः छन्दांसि | -उपजाति (578), अनुष्टुप (548), रथोद्धता (147), वैतालीयम् (91), वंशस्थम् (69), द्रुतविलम्बितम् (54), बसन्ततिलका (46), मालिनी (10) |
| 26. प्रमुख पात्राणि | -दिलीपः, सुदक्षिणा, वसिष्ठः, . कामधेनुः नन्दिनी, रघुः कौत्सः कुबेर, अजः, इन्दुमती, नारदः, दशरथः, रावणः श्रीरामः, सीता, लक्ष्मण, भरतः, लव-कुशः |
| 27. राज्यलक्ष्मीः अपि मह्यम् न साम्प्रतं रोचते कम् ? | -दिलीपम् |
| 28. वागर्थाविव सम्पृक्तौ ....... | -रघुवंशम् 1/1 |
| 29. क्व सूर्यप्रभवो वंशः क्व च | -रघुवंशम् 1/2 |
| 30. 'त्यागाय संभृतार्थानां सत्याय मितभाषिणाम्' इत्यत्र अलंकारः | -परिसंख्या |
| 31. कः एकाग्रचित्तः सन् गोसेवाव्रते संलग्नः सजायते। | -दिलीपः |
| 32. "जगतः पितरौ वन्दे' इत्यत्र वन्दे' क्रियायाः कर्ता | -कालिदासः |
| 33. क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः | -निदर्शनालंकारः |
| 34.. 'अल्पविषया मतिः' कः समासः | -बहुव्रीहिः |

## 'किरातार्जुनीयम्' महाकाव्यम

### 'किरातार्जुनीयम्' इत्यस्य व्युत्पत्तिः

किरातार्जुनीयम्-इत्यत्र द्वौ शब्दौ स्तः-"किरातश्च अर्जुनीयञ्च अर्थात किरातवेषधारिणं भगवन्तं शिवम् एवं तृतीयं पाण्डवम् अर्जुनमभिलक्ष्य कृतं काव्यं 'किरातार्जुनीयम्' इत्यभिधीयते। पाण्डवानां वनवास समये यदा अर्जुनः महर्षेः व्यासस्य आदेशं प्राप्य पाशुपतः अस्त्रस्य प्रास्यर्थम् इन्द्रकीलपर्वतं गतवान् । तदा भगवान् शिवः किरातवेषमाधृत्य अर्जुनस्य वीरतायाः परीक्षार्थम् अर्जुनेन सार्ध युद्धमकरोत् । एषा एव अस्य महाकाव्यस्य प्रामुख्येन घटना अवर्तत अतः अस्य नामधेयम् "किरातार्जुनीयम् इति कृतम् । सर्वेषां सुविदितमस्ति यदर्जुनः महाभारतस्य सुप्रसिद्धः पात्रः अस्ति।

**'किरातार्जुनीयम्' इत्यस्य महाकाव्यस्य प्रथमसर्गस्य सारः।**

भारवेः किरातार्जुनीय महाकाव्यस्य प्रथम सर्गे द्रौपद्याः तेजस्विरूपस्य चित्रणं प्राप्यते। काव्यस्य प्रारम्भ द्वैतवनाद् भवति यत्र युधिष्ठरादयः पञ्च पाण्डवाः वनवासस्य अवधिं व्यतिगमयन्तः आसन् । युधिष्ठिरः स्वाश्रमात् एकं वनेचरम् अर्थात किरातं स्वकीयं विश्वसनीय गुप्तचरं दुर्योधनस्य शासनपद्धतिं वेदितं हस्तिनापुरं प्रेषयत् । सः वनेचर; ब्रह्मचारिवेषमाधाय तत्र गतवान् तथा सर्व सम्यग्ज्ञात्वा द्वैतवने स्वस्वामिनः युधिष्ठिरस्य अन्तिकमागच्छत् । सः निवेदितवान् यद दुर्योधनेन स्वोत्तमशासनपद्धत्या सर्वे प्रजाजनाः स्ववशे कृताः सन्ति । तथापि सः सततं पाण्डवेभ्यः भीतः प्रतीयते। वृत्तान्तमिदमाकर्ण्य द्रौपदी क्रोधयुक्ता सञ्जायते तथा सा यधिष्ठिरं युद्धाय प्रोत्साहयति । द्रौपदी स्वमानसिकव्यथाकारणादेत एव यधिष्ठिरस्य समक्ष मार्मिकान् शब्दान् व्यक्ति । हे महाराज! भवता तु दुर्जनेन दारवन नीतिमनुसृत्य दुर्योधनं प्रति सरलः नीतिपूर्णः व्यवहारश्च न स्तितः पाण्डवानामिय विपत्तिः लक्ष्म्याः चाञ्चल्यकारणात नो सम्प्राप्ता पमादहेनैव समागताऽस्ति । भवदीयः शान्तिमार्गः वीरपुरुषाणां सेवनीयो स्ति । भवदीयाः चत्वार अनुजास्तु दुर्दशा प्राप्नुवन्ति, सहैव मामकी भावकी च दयनीया दशा वरिवर्ति। अतो भवान् शत्रून् संहर्तुं तदेव तेजः दधातु, यद्भवत्पूर्वजानां प्रकृतिरस्ति।

**श्लोकानां व्याख्या**

**श्रियः कुरूणामधिपस्य पालनी,**
**प्रजासु वृत्तिं यमयुङ्क्तवेदितुम् ।**
**स वर्णिलिंगी विदितः समाययौ,**
**युधिष्ठिरं द्वैतवने वनेचरः।।1/1।।**

**प्रसंगः**-महाराजः युधिष्ठिरः स्वपितृव्य भ्रातुः दुर्योधनस्य द्यूतकपटेन स्वराज्यस्य पराधीनत्वात् त्रयोदशवर्षाणि यावत् वनवासस्य प्रतिज्ञा निर्वाह्य द्वैतवने निवसन्नासीत् । तदानीं दुर्योधनस्य राज्यस्य समाचारान् अवगन्तुम् प्रेषितः गुप्तचरः वनेचरः तत्र सर्व विज्ञाय स्वस्वामिनः युधिष्ठिरस्य अन्तिकम् आगच्छति।

**व्याख्या**-कुरु जनपदानां राज्ञः स्वामिनः दुर्योधनस्य राजलक्ष्म्याः संरक्षिकाम् अर्थात् प्रजापालनपद्धतिं सम्यग् अवगन्तु महाराजः युधिष्ठिरः यं पूर्व नियुक्तवान् स्वगुप्तचररूपेण, सः ब्रह्मचारिवेषधारी किरातः दुर्योधनस्य राज्यस्य सर्वाणि वृत्तानि सम्यकप्रकारेण ज्ञात्वा, तेषां गम्भीरमध्ययनं कृत्वा द्वैतवननामानं तपोवनं स्व-स्वामिनः युधिष्ठिरस्य पार्श्वम् प्रत्यागतवान् ।

**कृतप्रणामस्य महीं महीभुजे,**
**जितां सपत्नेन निवेदयिष्यतः।**
**न विव्यथे तस्य मनो नहि प्रियं,**
**प्रवक्तुमिच्छन्ति मृषा हितैषिणः।।1/2।।**